विद्या भवन बालिका विद्यापीठ लखीसराय

वर्ग नवम् विषय संस्कृत शिक्षक श्यामउदय सिंह

ता:-११/०७/२०२०   बेस्ड आन एन.सी.ई.आर.टी.

अधोलिखितगद्यांशं पठित्वा तदाधारितानां प्रश्नानां उत्तराणि संस्कृतभाषया लिखत-

भ्रान्त: कश्चन् बाल: पाठशालागमनवेलायां क्रीडितुं निर्जगाम् ।किन्तु तेन सह केलिभिः कालं क्षेप्तुम् तदा कोऽपि न वयस्येषु उपलभ्यमान आसीत् ।यतस्ते सर्वेऽपि पूर्वदिनपाठान् स्मृत्वा विद्यालयगमनाय त्वरमाणा बभूवु:। तन्द्रालुर्बालो लज्जया तेषां दृष्टिपथमपि परिहरन्नेकाकी किमप्युद्यानं प्रविवेश ।

स चिन्तयामास -विरमन्त्वेते वराका:पुस्तकदासा:।अहं पुनरात्मानं विनोदयिष्यामि। ननु भूयो द्रक्ष्यामि क्रुद्धस्य उपाध्यायस्य मुखम् ।सन्त्वेते निष्कुटवासिन एव प्राणिनो मम वयस्या इति ।

१.एकपदेन उत्तरत-

(i) बालक कीदृश: आसीत् ?

(ii)कस्मिन् समये स:क्रीडितुं निर्जगाम्?

२.पूर्णवाक्येन उत्तरत-

(i) बालकेन सह कदा वयस्येषु उपलभ्यमान आसीत्?

(ii)सर्वे बाला: किम् अकुर्वन् ?

३.भाषिककार्य –

(i)बाल: इति पदस्य विशेषण पदं किम् ?

(ii)'चिन्तयामास' इति पदस्य कर्ता क:?

(iii)'प्राणिनो मम वयस्या इति'अत्र ‘मम’ पदं कस्मै प्रयुक्तम्?

(iv)’आचार्यस्य'इति पदस्य गद्यांशे किं पदं प्रयुक्तम् ?